नादरूपेण श्रूयते शक्तिरेव सा। यस्तस्यान्तो निराकारः स एव परमेश्वरः। नादः शक्तिरिति ज्ञेयं नादस्थानं सदाशिवः। ज्ञेयस्थाने विलीने च सोऽसावेवावशिष्यते। नादोयावान् मनस्तावन्नादान्ते तु मनोन्मनी। सशब्दं कथितं ब्रह्म निःशब्दं ब्रह्म कथ्यते। सदा नादानुसन्धानात् संक्षीणाः सर्ववासनाः। निरञ्जने विलीयन्ते निश्चितं मारुतात्मनः। नादकोटिसहस्राणि बिन्दुकोटिशतानि च। सर्वे तत्र लयं यान्ति यत्र देवी निरञ्जना" हठप्र०।

हठयोगफलम् ईश्वरमीनसंवादे "यदा परिचये शक्तिश्चलितोर्द्ध्वमुपैति खम्। षट्चक्राणि क्रमाद्भित्त्वा तदा स्युरणिमादयः। पुरा ग्रन्थित्रयं भित्त्वा यात्यूर्द्ध्वं मरुतोरगी। स्फुटन्ति पृष्ठवंशास्थिग्रन्थयो योगिनस्तदा। वायुस्तदैव सर्वाङ्गे लीनो भवति मज्जितः। धीरैः केवलकुम्भः स उच्यते सर्वसिद्धिदः। मूलाधारं यदाऽपानो भित्त्वोर्द्ध्वं याति वेगतः। तदातीतानागतज्ञो योगी भवति सत्त्वधीः। स्थितिं भित्त्वाऽर्द्धगाऽपानक्षोभिता स्वाद्यदोरगी। तदा नादोत्पत्तिरस्य जायते योगिनो हृदि। स्वदङ्गनादोत्पत्तिस्तु मणिपूरभिदा भवेत्। अनाहतविभेदेन घण्टाध्वनिरुदेति च। विशुद्धचक्रभेदेन यन्त्रनादः प्रजायते। यदा त्वाज्ञाचक्रभेदस्तदोपैति मनोलयम्। सहस्रदलकमलं वायुना शक्तिराव्रजेत्। यदा तदा सुनिस्तिष्ठेदाकल्पं सहजेऽव्ययम्"। पवनयोगसंग्रहे "महामुद्रां समभ्यस्य महाबन्धमतः परम्। महावेधञ्च नियत प्रकुर्य्याच्छक्तिचालनम्। आसनं सुदृढं बद्ध्वा मूलबन्धं विधाय च। उड्डियानं तथा बद्धं ततो जालन्धराभिधम्"। "अभ्यसेदिति सम्बन्धः।

"प्राणे सुषुम्णां सम्प्राप्ते नादोऽन्तः श्रूयतेऽष्टधा। घण्टादुन्दुभिशङ्खाब्धिवीणावेणुवादितालवत्। तनूनपात्स्फुलिङ्गतारातारेशातपनोपमम्। ब्रह्मनाडीं गते प्राणे विश्वरूपं प्रकाशते। तथाच विश्वरूपाचार्य्यः "यदा संक्षीयते प्राणो मानसञ्च प्रलीयते। तदा समरसत्वं यत्समाधिः सोऽभिधीयते। मनःस्थैर्य्यात् स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत्। बिन्दुस्थैर्य्यात् सदा सत्त्वं पिण्डस्थैर्य्यं प्रजायते"। सैषा निष्पत्तिदशा साधकस्य राजयोगाख्या इति तथा च हठप्रदीपिकायाम्। "प्रनष्टोच्छ्वासनिःश्वासः प्रध्वस्तविषयज्वरः। निश्चेष्टो निर्विकारश्च लयो जयति योगिनः। तथा चोक्तं ग्रन्थान्तरे "मुक्ते सते तु वायोः स्यान्नाडिरस्खलिता ततः। अधोगतिं विहायाशु भवत्यूर्द्ध्वमुखस्ततः। अपानस्तूर्द्ध्वगो भूत्वा वह्निना सह गच्छति। प्राणस्थानं ततो वह्निः प्राणापानौ च सत्वरम्। मिलित्वा कुण्डलीं नीत्वा प्रसुप्तां कुण्डलीं पुनः। प्रसह्य विंशतिस्थानं सुषुम्णा वज्रग्रन्थिकम्। ब्रह्मग्रन्थिं ततो भित्त्वा रजोगुणसमुद्भवम्। सुषुम्णावदनस्याशु प्रयात्यूर्द्ध्वञ्च सत्वरम्। विष्णुग्रन्थिं प्रयात्युच्चैः सत्वजं हृदि संस्थितम्। वेगेन महता गच्छेद्विष्णुग्रन्थिं विभिद्य सा। ऊर्द्ध्वं गच्छति यस्मात्तु रुद्रग्रन्थिस्तमोभवः। तत ऊर्द्ध्वं सुषुम्णाया याति शीतांशुमण्डलम्। आकुलाख्यं तु तच्चक्रं दलैः षोडशभिर्युतम्। तत्र शीतांशुसम्भूतं द्रावं शोषयतेऽनिशम्। चलिता प्राणवेगेन रक्तपित्तरवेन्दुकम्" हठस०।

"योगिनः कालवञ्चनोपायो यथा "ज्ञात्वा कालं निजं योगी लयस्थानं समाश्रितः। युञ्जीत योगं कालस्य वञ्चनाय यथाक्रमम्। बद्धसिद्धासने देहं पूरयेत् प्राणवायुना। कृत्वा दण्डस्थिरं बुद्ध्या दश द्वाराणि रोधयेत्। बद्ध्वा च खेचरीं मुद्रां ग्रीवायाञ्च जलन्धरीम्। अपाने मूलबन्धञ्च उड्डियानं तथोदरे। उत्थाप्य भुजगीं शक्तिं मूलाधाराम्बुजस्थिताम्। सुषुम्णान्तर्गतां पञ्चचक्राणां भेदिनीं शिवाम्। जीवं हृदाश्रयं नीत्वा यान्तीं बुद्धिमनोयुताम्। सहस्रदलमध्यस्थशिवे लीनां सुधारयेत्। ततः सुधाकरोद्भूतममृतं तेन मूलतः। सिञ्चन्तीं सकलं देहं प्लावयन्तीं विचिन्तयेत्। तथा सार्द्धं ततो योगी शिवेनैकात्मतां व्रजेत्। परानन्दमयो भूत्वा चिद्रूपत्वमपि संत्यजेत्। ततोऽलक्ष्यमनाभासमहाभावविवर्जितम्। सर्वकल्पनाहीनं कथं कालो निहन्ति तम्। स एव कालः सर्वेशः सर्वो नाच्युतः परः। कः केन हन्यते तत्र म्रियते नापि कश्चन। ततो व्यतीते समये कालस्य भ्रान्तिरूपिणि। योगी सुप्तोत्थित इव प्रतिबोधे प्रबोधितः। एवं सिद्धो भवेद्योगी वञ्चयित्वा विधानतः। कालं कलितसंसारपौरुषेणाद्भुतं हि तम्। ततस्त्रिभुवने योगी विचरत्येक एव सः। पश्यन् संसारवैचित्र्यं स्वेच्छया निरहङ्कृतिः" हठस०।

**हठालु** पु० हठः प्लवमानः आलुरिव। कुम्भिकायाम् (राजा) शब्दच०। [पर्णिः।

**हठी** स्त्री हठ-अच् गौरा० ङीष्। वारिपर्ण्याम् (राजा)